# Vyasadiproktam Shivarahasyamahetihasamahimavarnanam

# વ્યાસાદિપ્રોક્તં શિવરહસ્યમહેતિહાસમહિમવર્ણનમ્

## Document Information

Text title : Vyasadiproktam Shivarahasyamahetihasamahimavarnanam

File name : vyAsAdiproktaMshivarahasyamahetihAsamahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 50 | vAvRittashlokAH ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# વ્યાસાદિપ્રોક્તં શિવરહસ્યમહેતિહાસમહિમવર્ણનમ્

વ્યાસઃ -
ઇયં શિવકથાસુધામુહુરુમામનોહારિણી
શિવેન કથિતા પુરા ત્રિપુરવૈરિણા સાદરમ્ ।
અપારસુકૃતાર્ણવૈઃ પરમવાપ ભૂમણ્ડલં
મહાઘલયકારણં કરણમાશુ મુક્તેઃ પરમ્ ॥ ૧૫૧॥

રહસ્યમેતદ્રહસિ શ્રુતં પુરા પુરારિવક્ત્રામ્બુરુહેણ ગૌર્યા ।
અનેકકલ્પાવધિસાવધાનમાત્રેડિતં સાધુ સુધારસેન ॥ ૧૫૨॥

તતઃ કદાચિદ્ગણનાયકેન શ્રુતં શિવાવક્ત્રસરોરુહેણ ।
સ્કન્દેન તસ્માત્ શ્રુતમાદરેણ શ્રીનન્દિકેશેન તતઃ શ્રુતં ચ ॥ ૧૫૩॥

તતઃ સુરૈરેતદતિપ્રયત્નૈઃ પ્રાપ્તં રહસ્યં મુનયો મયેદમ્ ।
નારાયણેનોક્તમતિપ્રયત્નાત્ આરાધિતેનૈવ મુહુર્મયાપિ ॥ ૧૫૪॥

ઇદં રહસ્યં ખલુ ગોપનીયં રત્નસ્વરૂપં ખલુ રત્નરત્નમ્ ।
ભક્તાય દેયં ખલુ શામ્ભવાય જ્ઞાત્વા સ્વરૂપં પુનરાદરેણ ॥ ૧૫૫॥

એતદ્યથા કર્ણપથં પ્રયાતિ શૈવં રહસ્યં પરમં પવિત્રમ્ ।
કરોતિ તાવત્ સકલાઘનાશં સંસારઘોરાદ્ભુતરાશિનાશમ્ ॥ ૧૫૬॥

પિશાચાઃ -
એતત્પુસ્તકમાદરેણ લિખિતં યઃ પૂજયેત્ સન્તતં
તત્સન્તાનસમૃદ્ધિરક્ષયસુખાવાપ્તિર્મહાઘક્ષયઃ ।
સ્યાદેવેતિ શિવપ્રસાદદમિદં શૈવં રહસ્યં પરં
શ્રોતવ્યં શિવપૂજનાદરરસૈર્માહેશ્વરૈરન્વહમ્ ॥ ૧૮૫॥

ધન્યં ભાલતલં વિભૂતિલલિતં રુદ્રાક્ષમાલાઙ્કિતં
ધન્યં કર્ણતલં ચ નેત્રયુગલં ધન્યં શિવાલોકનૈઃ ।
ધન્યં શ્રોત્રયુગં ચ શઙ્કરકથાપીયૂષધારાવૃતં

ધન્યં માનસમમ્બિકાપતિપદધ્યાનાનુરક્તં સદા ॥ ૧૮૮॥

ધન્યં મન્દિરમિન્દુશેખરપદાચારાદરાત્યાદર-
વ્યાહારવ્યવહારધીરરુચિરવ્યાપારદારાકરમ્ ।
હારાપારકુમારવીરસુકરાસારપ્રસારાચિરં
પ્રાકારપ્રવરં પરં પરમિદં કિં ધન્યમન્યદ્ભવેત્ ॥ ૧૮૯॥

શ્રીકાલકાલમહિલાબલકાલકાલહાલાહલામલગલામલજાલભાલ ।
કલ્લોલલોલકમલામલપત્રજાલમૂલત્રિશૂલમમલં કલયેઽનુવેલમ્ ॥ ૧૯૦॥

શ્રીગૌરીરમણપ્રભાવકથનાનન્દેન મન્માનસં વ્યાપ્તં
પ્રાપ્તમતઃ પરં શિવપદામ્ભોજાર્ચનાનાં ફલમ્ ।
સ્કન્દાનન્દદમેતદેવ પરમં શૈવં રહસ્યં મુહુઃ
મોહાગ્નિપ્રલયામ્બુવાહ ઇતિ મે વૃદ્ધિઃ પ્રવૃદ્ધા મુદે ॥ ૧૯૧॥

ઋષયઃ -
યે વાઞ્છન્તિ શિવં શિવામિતકથારૂપસ્ફુરત્સ્વર્ધુની
નિર્ધૂતાખિલપાતકાત્મકમલાઃ શીલાઃ સુશીલાઃ કલૌ ।
તે સર્વે વયમેવ સન્તતમુમાકાન્તપ્રસાદાત્ પરં
સમ્પ્રાપ્યાત્ર શિવઙ્કરં શિવમિતિ ધ્યાત્વા શિવં યાન્ત્યપિ ॥ ૧૯૯॥

અજ્ઞાનોરુતરાન્ધકારલહરીપૂરારુણઃ કોપ્યયં
વિજ્ઞાનામૃતસાગરઃ શિવકથારૂપો વિરૂપં પરમ્ ।
સર્વં શર્વરૂપમેવ કુરુતે મુક્તાનમુક્તાનહો
તદ્બિન્દુસ્ફુરદિન્દિરાકરકરં કર્તું સમર્થઃ શ્રુતઃ ॥ ૨૦૦॥

યોગાભ્યાસરતા ભવન્તુ બહવઃ તીર્થાટનાદ્યુદ્યતાઃ
તીર્થાવાસરતાશ્ચ નિષ્ઠુરગિરિદ્વારાન્ધકારાદરાઃ ।
તત્રાસ્થા મમ માસ્ત્વહં શિવરહસ્યાપારવર્ણસ્ફુર-
ન્નિશ્રેણીશિખરેણ શઙ્કરકુલાલમ્બી શિવં પ્રાર્થયે ॥ ૨૦૧॥

કણ્ઠે તિષ્ઠતિ યસ્ય વા શિવરહસ્યાનન્તચિન્તામણિઃ
નિત્યં તદ્વશતાં પ્રયાન્તિ વિબુધાઃ કાલાન્વિતાઃ સ્વાન્વિતાઃ ।
તદ્ગેહાઙ્ગણમેત્ય તિષ્ઠતિ રમા વાણીશચીસંયુતા
તદ્ભાગ્યાવધિમિન્દુખણ્ડવિલસન્મૌલિઃ પરં વેત્ત્યહો ॥ ૨૦૨॥

આરુહ્યામહં મુહુઃ શિવરહસ્યાનન્દદં સ્યન્દનં

ઋગ્વેદાદિકવેદચક્રઘટિતં વ્યાસાદિકૈશ્ચાશ્રિતમ્ ।
હારાપાખરધ્વજં શિવકથાશય્યાવિતાનાન્વિતં
શર્વાધિષ્ઠિતમન્તરાયરહિતવ્યાપારમાનન્દયે ॥ ૨૦૩॥

પશ્યામઃ શતશઃ શિવઙ્કરશિવાકાન્તાતિકાન્તા-
મિતાનન્તાનન્દકથાસુધાકરકરવ્યાપારસારાકરમ્ ।
હારશ્રીકરતારકં શિવરહસ્યાનન્દમત્યદ્ભુતં
હારાચારચિરાચિરદ્યુતિહરવ્યાહારગઙ્ગાવૃતમ્ ॥ ૨૦૪॥

અત્યલ્પં ફલમિન્દિરારમણતારૂપં વિધિત્વાત્મકં
ત્રૈલોક્યાધિપતિત્વમપ્યગસુતાકાન્તાર્ચકસ્યેત્યતઃ ।
અન્યત્ તાવદભૂતપૂર્વમમરાપ્રાપ્યં કિમપ્યમ્બિકા-
કાન્તાનન્દકથોત્સુકસ્ય ચ પરં કલ્પ્યં ફલં તદ્વિધેઃ ॥ ૨૦૫॥

શ્રુત્વાપિ પ્રયતો દ્વિજઃ શિવરહસ્યાર્ધાર્ધભાગાક્ષરા
પારશ્રીકરધીરવીરવમપ્યસ્તાઘકોટિર્ભવેત્ ।
મુક્તોઽપીતિ શપામિ શઙ્કરપદામ્ભોજે ભુજાવુન્નતૌ
કૃત્વા દેવગણસ્તુતાં શિવકથાં મત્વાપિ નત્વા શિવૌ ॥ ૨૦૬॥

સત્યં તાવદિહોચ્યતે શિવરહસ્યાનન્દમન્દાકિની
કલ્લોલાનિલપોતપૂતહૃદયામ્ભોજેષુ મૃત્યુઞ્જયઃ ।
નૃત્યત્યમ્બિકયા સહામૃતરસૈઃ કૈલાસવાસેન વા
કૃત્યં નેતિ મુહુર્મુહુઃ શિવરહસ્યાનન્દકન્દાદરઃ ॥ ૨૦૭॥

શ્રુત્યન્તાઃ પ્રમથાધિનાયકકથાપૂતાસ્તતસ્તત્કથા-
મધ્યસ્થાક્ષરરૂપમપ્યઘગિરિપ્રધ્વંસવજ્રાયુધમ્ ।
તત્પાદામ્બુધિવાડવોઽપ્યઘકુલાપારાન્ધકારા-
મિતાનભ્રાર્કામૃતરાશિમણ્ડલકુલં કિં વા સુધાસાગરઃ ॥

કસ્તૂરીખલ્યબિલ્વશ્વમિવ સુકરાપારરત્નાકરોરુ
(કસ્તૂરીસ્વલ્પખિલ્યમિવ સુકૃતકરાપાર)
શ્રીયુક્તાનન્તમુક્તાફલમિવ વિમલં શૈવમેતદ્રહસ્યમ્ ।
ધૃત્વા ભાવોઽપિ ભાતિ પ્રભુવિ જગતાં શમ્ભુભક્તપ્રભાવો
ભાવો ભાગ્યામ્બુરાશિઃ શિવપદકમલારાધકઃ કોઽપિ લોકે ॥ ૨૦૯॥

કિં તસ્યાવભૃથાપ્લવૈઃ સુરસરિદ્રેવાદિતીર્થાપ્લવૈઃ
કિં ગોકોટિતુલાદિદાનનિકરૈઃ કિં દિવ્યતીર્થાટનૈઃ ।

ભક્તિશ્રેદ્રિરિશાર્ચને શિવરહસ્યાનન્દસિન્ધુસ્ફુર-
દ્ધીરાપારતરઙ્ગમઙ્ગલકથાભાગાર્ધભાગોઽપિ વા ॥ ૨૧૦॥

સંસારાદ્ભુતસાગરં શિવરહસ્યોત્કૃષ્ટલોકાશ્રિતઃ
શ્રીવિશ્વેશ્વરકર્ણધારકૃપયા તીર્ત્વાબ્ધિ નક્રૈર્ભયમ્ ।
ત્યક્ત્વા તત્પરપારરૂપપરમાનન્દસ્વરૂપામ્બિકા
કાન્તાનન્દદપાદપદ્મપુલિનાસીનો ન સીદામ્યહો ॥ ૨૧૧॥

પાયાદન્વહમેવ વઃ શિવરહસ્યામ્ભોરુહં કન્દતિ
સ્કન્દો નાલતિ તન્મનઃશિવપદામ્ભોજપ્રભા કોશતિ ।
પત્રન્તીશગુણાઃ શિવાઙ્ઘ્રિકમલં તત્કર્ણિકારૂપતિ
સ્વાન્તં મે ભ્રમરત્યુમાપતિકથા તત્કેસરન્તિ સ્વતઃ ॥ ૨૧૨॥

પાયાદઙ્ગતામ્બિકાઙ્કવિલસત્પર્યઙ્કલીલાલતા-
પારાનન્દદસિન્દુરાનનસુધાદાનાકરઃ શાઙ્કરઃ ।
સ્કન્દાલોકનસાદરો ગિરિસુતાસ્મેરાધરાસ્વાદ-
નાનન્દાલોલિતવિગ્રહો મુહુરુમાદિવ્યાઙ્ગસઙ્ગપ્રિયઃ ॥ ૨૧૩॥

પાયાદવ્યયભવ્યભૂરિવિભવો ભૂભૃત્કુમારીકરા-
પારશ્રીકરતારહારરુચિરાલઙ્કારશઙ્કાકરઃ ।
કિં ગૌરીકરજાજિરાતિરુચિરશ્રીઃ પદ્મરાગાધરા-
ધારશ્રીરિયમિત્યુમાપરિવૃઢો ગાઢં શિવાલિઙ્ગિતઃ ॥ ૨૧૪॥

પાયાદર્ધેન્દુમૌલિઃ શ્રુતિકથિતકથા કલ્પવૃક્ષોઽતિદક્ષો
દિક્ષુ વ્યાપ્તઃ ક્ષણં વા ભવભવભવજાપારતાપાપહારઃ ।
સ્મૃત્યારૂઢોઽપિ યોષિત્પરિવૃઢગિરિજારક્ષિતો વેદશાખઃ
નન્દીશાદિપ્રસૂનો મુનિજનમધુપો મોક્ષલક્ષ્મીફલાઢ્યઃ ॥ ૨૧૫॥

પાયાદર્ધાઙ્ગગૌરીકરકમલકથારત્નસિન્ધુર્યતોઽભૂત્
તત્વજ્ઞાનામૃતાંશુઃ શિવભજનસુધાશૈવકલ્પદ્રુમોઽપિ ।
શઙ્ગશ્રીલિઙ્ગપૂજાવ્રતનિયમમણિર્ભક્તિભૂકામધેનુઃ
વૈરાગ્યૈરાવૃતોઽપિ ત્રિનયનચરણધ્યાનરૂપાપિ લક્ષ્મીઃ ॥ ૨૧૬॥

પાયાદર્ધશશાઙ્કશેખરકથાશ્રીકામધેનુર્યયા
લિઙ્ગારાધનપુણ્યલક્ષણમભૂત્ ક્ષીરં તદપ્યક્ષરમ્ ।
આમિક્ષાપિ વિલક્ષણા શિવયશોરૂપા શિવાધિક્યતા
ધીરૂપં દધિ શઙ્કરાઙ્ઘ્રિકમલસ્નેહાવૃતં તદ્ધૃતમ્ ॥ ૨૧૭॥

કર્તવ્યા નગનિમ્નગાબ્ધિસિકતાનીરાંશભૂભૃદ્ભવા
પારાંશાંશધનાંશભાગગણના કાલેન કાલેન વા ।
બ્રહ્માદ્યૈરપિ સાદરૈઃ શિવરહસ્યોક્તાક્ષરાર્ધાક્ષર
વ્યક્તાકર્ણનપુણ્યશૈલગણના કર્તું ન શક્યા દ્વિજાઃ ॥ ૨૧૮॥

સ્વસ્ત્યસ્તુ પ્રિયમસ્તુ શં શિવરહસ્યાકર્ણને સન્તતં
વિશ્વાસોઽસ્તુ શિવાર્ચને શિવજને ભૂતિત્રિપુણ્ડ્રે શિવે ।
રુદ્રાક્ષાભરણે શિવાર્ચનરતાઃ પુત્રાઃ પવિત્રાસ્તતઃ
પૌત્રાદ્યા અપિ સન્તુ શોભનકુલાન્યાકલ્પમાયુશ્ચ વઃ ॥ ૨૧૯॥

ભો ભો ભવાદ્ભુતદવાનલજાલમાલા-
સન્તાપભીઃ શિવરહસ્યકથાભિવૃષ્ટ્યા ।
શાન્તાઃ પ્રશાન્તહૃદયાઃ સદયા ભવન્તઃ
સ્વાત્મન્યુમારમણપાદરજો ભજધ્વમ્ ॥ ૨૨૦।
સંસારોરુવસન્તસૂરકિરણવ્યાપારતાપાતુરાપારં
શ્રાન્તિવિનાશિનીં શિવરહસ્યાભૂતપૂર્વપ્રપામ્ ।
કો વા નેચ્છતિ વાઞ્છિતં યદિ ભવેદિષ્ટં પરં જીવનં
ત્યક્ત્વા સ્વાત્મવિઘાતકં કલિમલાક્રાન્તં કલૌ કેવલમ્ ॥ ૨૨૧॥

સ્કન્દઃ -
આચન્દ્રાર્કમિદં રહસ્યમનિશં શૈવં શિવાર્થે મુદા
શ્રોતવ્યં સુખસન્તતિપ્રદમુમાકાન્તપ્રિયં સાદરમ્ ।
એતત્પુસ્તકદાનમપ્યઘહરં પુણ્યામ્બુરાશિપ્રદં
સર્વાભીષ્ટદમપ્યતઃ શિવરતૈઃ શ્રાવ્યં શ્રુતિવ્યાહૃતમ્ ॥ ૨૨૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વ્યાસાદિપ્રોક્તં શિવરહસ્યમહેતિહાસમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૫૦। વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 50. vAvRRittashlokAH ..

Notes:

Vyāsa વ્યાસ et al speak about the merits of reading, listening to, and/or donating the book ŚivaRahasyaM શિવરહસ્યમ્.

Proofread by Ruma Dewan

*Vyasadiproktam Shivarahasyamahetihasamahimavarnanam*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*